श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीपराङ्कुश यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळम् ॥

श्रीश्रीनिवासयतिराण्णारायणमुनीश्वरौ ।
वीरराघववेदान्तयतीन्द्रमभिसंश्रये ॥

कन्याज्येष्ठावतीर्णाय कारुण्यात् कमलापतेः ।
आदिवण्शठकोपाख्ययतीन्द्रायास्तु मङ्गळम् ॥ 1 ॥

साक्षाच्छठारिर्योगीन्द्रः समाहूय स्वनामतः ।
पाञ्चजन्यादिकं यस्मै दत्तवांस्तस्य मङ्गळम् ॥ 2 ॥

अहोबिले श्रीनृसिंहः प्रेषमन्त्रं स्वयं ददौ ।
योगिरूपेण यस्यास्मै शठकोपाय मङ्गळम् ॥ 3 ॥

भाष्यकारः पुनर्भूमौ भाष्यप्रवचनादरात् ।
यद्रूपेणागतस्तस्मै शठकोपाय मङ्गळम् ॥ 4 ॥

रहस्यत्रयसाराख्यराकाचन्द्रस्य वारिधिः ।
वेदान्तदेशिकस्सोऽयमेवं तर्क्याय मङ्गळम् ॥ 5 ॥

श्रीनृसिंहदयादत्तश्रीमदास्थानवारिधेः ।
अकलङ्कः कलानाथो यस्तस्मै नित्यमङ्गळम् ॥ 6 ॥

श्रीवैष्णवसमाजस्य श्रीसमाख्यातसंपदः ।
कारणं योऽभवत्तस्मै शठकोपाय मङ्गळम् ॥ 7 ॥

लक्ष्मीनृसिंहकरुणा लक्ष्मीविहरणोचितः ।
य आदिशठकोपाख्यः तस्मै भवतु मङ्गळम् ॥ 8 ॥

यन्मङ्गळाशासनेन यच्छन्मङ्गळमन्वहम्।
श्रीनृसिंहस्सञ्चरति तस्मै भवतु मङ्गळम्॥ **9** ॥

यत्कटाक्षेण सर्वेऽपि यत्स्थानागतयोगिनः।
श्री नृसिंहदयापूर्णाः तन्मुनेर्मङ्गळं सदा॥ **10** ॥

यच्छिष्याग्र्यो वैदिकानां सार्वभौमत्वमेत्य च।
रत्नाकरादीन् कृतवांस्तन्मुनेर्मङ्गळं सदा॥ **11** ॥

नारायणमुनीन्द्राख्यो यच्छात्रो यत्कृपावशात्।
षष्टिप्रबन्धनिर्माता खल्वस्मै मङ्गळं सदा॥ **12** ॥

‡ श्रीशठारियतीन्द्रादि योगिहृत्पद्मभानवे।
सर्वत्र परिपूर्णायाहोबिलेशाय मङ्गळम्॥ **13** ॥

‡ पराङ्कुशमुनीन्द्रेण भक्त्यास्मै मङ्गळं कृतम्।
यः पठेत् स भवेद्धन्यः श्रीनृसिंहकृपावशात्॥ **14** ॥

श्रीरामानुजसिद्धान्तनिर्धारण धुरन्धरः।
आदिवण्शठकोपाख्ययतीन्द्रो जयतात् भुवि॥ **15** ॥

॥ इति श्रीमदादिवण्शठकोपयतीन्द्र महादेशिक मङ्गळं समाप्तम्॥